श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री विष्णुपुराणे प्रह्लादेन कृतं

# ॥ श्री नृसिंहस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहस्तोत्रम् ॥

प्रह्लादः

नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम।
नमस्ते सर्वलोकात्मन् नमस्ते तिग्मचक्रिणे ॥ 1 ॥

नमस्ते वासुदेवाय नमस्ते करुणाकर।
नमस्ते विश्वरूपाय नमस्ते सर्वमूर्तये ॥ 2 ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ 3 ॥

ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते पुनः।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्तये ॥ 4 ॥

देवा यक्षाः सुराः सिद्धा नागा गन्धर्वकिन्नराः।
पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा ॥ 5 ॥

पक्षिणस्स्थावराश्चैव पिपीलिकसरीसृपाः।
भूम्यापोऽग्निर्नभो वायुः शब्दस्स्पर्शस्तथा रसः ॥ 6 ॥

रूपं गन्धो मनो बुद्धिः आत्मा कालस्तथा गुणाः।
एतेषां परमार्थश्च सर्वमेतत् त्वमच्युत ॥ 7 ॥

विद्याविद्ये भवान् सत्यं असत्यं त्वं विषामृते।
प्रवृत्तं च निवृत्तं च कर्म वेदोदितं भवान् ॥ 8 ॥

समस्तकर्मभोक्ता च कर्मोपकरणानि च।
त्वमेव विष्णो सर्वाणि सर्वकर्मफलं च यत्॥ 9॥

मय्यन्यत्र तथाऽशेषभूतेषु भुवनेषु च।
तवैव व्याप्तिरैश्वर्यगुणसंसूचिकी प्रभो॥ 10॥

त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च याजकाः।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृत्॥ 11॥

रूपं महत् ते स्थितमत्र विश्वं
ततश्च सूक्ष्मं जगदेतदीश।
रूपाणि सूक्ष्माणि च भूतभेदाः
तेष्वन्तरात्माख्यमतीव सूक्ष्मम्॥ 12॥

तस्माच्च सूक्ष्मादिविशेषणानाम्
अगोचरे यत्परमात्मरूपम्।
किमप्यचिन्त्यं तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय॥ 13॥

सर्वभूतेषु सर्वात्मन् या शक्तिरपरा तव।
गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर॥ 14॥

याऽतीतगोचरा वाचां मनसां चाविशेषणा।
ज्ञानिज्ञानपरिच्छेद्या तां वन्दे चैश्वरीं पराम्॥ 15॥

ओं नमो वासुदेवाय तस्मै भगवते सदा।
व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः॥ 16॥

नमस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने।
नाम रूपं न यस्यास्ति योऽस्तित्वेनोपलभ्यते॥ 17॥

यस्यावताररूपाणि समर्चन्ति दिवौकसः।
अपश्यन्तः परं रूपं नमस्तस्मै महात्मने॥ **18** ॥

योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम्।
तं सर्वसाक्षिणं विष्णुं नमस्ते परमेश्वरम्॥ **19** ॥

नमोऽस्तु विष्णवे तस्मै यस्याभिन्नमिदं जगत्।
ध्येयस्स जगतामाद्यः स प्रसीदतु मेऽव्ययः॥ **20** ॥

यत्रोतमेतत्प्रोतं च विश्वमक्षरसंज्ञके।
आधारभूतस्सर्वस्य स प्रसीदतु मे हरिः॥ **21** ॥

ओं नमो विष्णवे तस्मै नमस्तस्मै पुनः पुनः।
यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः॥ **22** ॥

सर्वगत्वादनन्तस्य स एवाहमवस्थितः।
मत्तस्सर्वमहं सर्वं मयि सर्वं सनातने॥ **23** ॥

अहमेवाक्षयो नित्यः परमात्माऽऽत्मसंश्रयः।
ब्रह्मसंज्ञोऽहमेवाग्रे तथाऽन्ते च परः पुमान्॥ **24** ॥

॥ श्री नृसिंहस्तोत्रं समाप्तम्॥